**CBSE Class 12 संस्कृत कोर**

**एनसीईआरटी प्रश्न-उत्तर**

**पाठ - 4 दूरदृष्टिः फलप्रदा**

---

**अनुप्रयोगः**

**1. कक्षायां छात्राणाम् विभाजनं व्दे वर्गे कुरू-**

**कालिदासवर्गः भासवर्गः च। कालिदासवर्गस्य प्रश्नानाम् उत्तराणि भासवर्गः, भासवर्गस्य प्रश्नानाम् उत्तराणि कालिदासवर्गः एकपदेन दास्यति-**

| | कालिदासवर्गः | भासवर्गः |
|---|---|---|
| (क) जलाशये कति मत्स्याः प्रतिवसन्ति स्म? | ................ | ................ |
| (ख) प्रभातसमये के आगत्य मत्स्यविनाशं करिष्यन्ति? | ................ | ................ |
| (ग) क्षारं जलं के पिबन्ति? | ................ | ................ |
| (घ) यद्भविष्यः कीदृशं सरः त्यक्तुं न इच्छति? | ................ | ................ |
| (ङ) कः आसीत् बहुमत्स्यः? | ................ | ................ |
| (च) सुरक्षितः कथं विनश्यतिः? | ................ | ................ |
| (छ) कुत्र विसर्जितः अनाथः अपि जीवति? | ................ | ................ |
| (ज) यः मत्स्यः जलाशयं न त्यजति, तस्य नाम किम्? | ................ | ................ |
| (झ) ह्रदः कैः निर्मत्स्यतां नीतः? | ................ | ................ |
| (ञ) मत्स्यजीविनः जालैः कस्य आलोडनं कृतवन्तः? | ................ | ................ |

**उत्तरम्-** (पहला प्रश्न कालिदासवर्ग की ओर से पूछा जाता है तथा उत्तर भासवर्ग की ओर से दिया जाता है, फिर यह क्रम बदलकर बारी-बारी से चलता है।)

| कालिदासवर्गः | भासवर्गः |
|---|---|
| (ख) मत्स्यजीविनः | (क) त्रय: |
| (घ) पितृपैतामहिक | (ग) मत्स्याः |
| (च) दैवहतः | (ङ) ह्रदः |
| | |

| | |
|---|---|
| (ज) यद्भविष्यः | (छ) वने |
| (ञ) जलाशयस्य | (झ) मत्स्यजीविभिः |

**2. अत्र वाक्येषु सर्वनामपदानि सन्ति। तेषाम् सर्वनामपदाम् कस्मै प्रयुक्तानि इति लिखत -**

1. **अस्माभिः** कदाचिदपि अयं ह्रदः न अन्वेषितः। **........................**
2. प्रत्युत्पन्नमतिः प्राह-अहो **भवता** सत्यम् उक्तम्। **........................**
3. अहो श्रुतं **भवद्भिः** यत् मत्स्यजीविभिः कथितम्। **........................**
4. **मम** अपि अभीष्टमेतत्। **........................**
5. **तस्य** निश्चयं ज्ञात्वा अनागतविधाता प्रत्युत्पन्नमतिश्च ततः निष्क्रान्तौ। **........................**

**उत्तरम्-**

1. अस्माभिः = **'मत्स्यजीविभ्यः'** - अस्मै पदाय।
2. भवता = **'अनागतविधात्रा'** - अस्मै पदाय।
3. भवद्भिः = **' मत्स्यै'** - अस्मै पदाय।
4. मम = **'प्रत्युत्पन्नमते'** - अस्मै पदाय।
5. तस्य = 'यद्भविष्याय' - अस्मै पदाय।

**3. अधोलिखिताः उक्तयः केन कं प्रति उक्ताः?**

| | **केन?** | **कं प्रति?** |
|---|---|---|
| (क) अहो! बहुमत्स्योऽयं ह्रदः। | ........................ | ........................ |
| (ख) तद् रात्रावपि गम्यतां निकटं सरः। | ........................ | ........................ |
| (ग) ममापि अभीष्टमेतत्। तदन्यत्र गम्यताम् इति। | ........................ | ........................ |
| (घ) अरक्षितं तिष्ठति दैवरक्षितम्। | ........................ | ........................ |
| (ङ) तन्न युक्तं साम्प्रतं क्षणमप्यत्र अवस्थातुम्। | ........................ | ........................ |

**उत्तरम्-**

| | **केन?** | **कं प्रति?** |
|---|---|---|
| (क) अहो! बहुमत्स्योऽयं ह्रदः। | मत्स्यजीविभिः | परस्परम् (मत्स्यजीविनःप्रति) |
| (ख) तद् रात्रावपि गम्यतां निकटं सरः। | अनागतविधात्रा | सर्वान् मत्स्यान् प्रति |

| | | |
|---|---|---|
| (ग) ममापि अभीष्टमेतत्। तदन्यत्र गम्यताम् इति। | प्रत्युत्पन्नमतिना | अनागतविधातारम् |
| (घ) अरक्षितं तिष्ठति दैवरक्षितम्। | यद्भविष्येण | उभे अनागतविधाता-प्रत्युत्पन्नमती |
| (ङ) तन्न युक्तं साम्प्रतं क्षणमप्यत्र अवस्थातुम्। | अनागतविधात्रा | सर्वान् मत्स्यान् प्रति |

**4. अत्र व्दे खण्डे अनेकानि कथनानि सन्ति। एतेषां कथनानां उचितं मेलनं कुरू -**

| 'क' स्तम्भ: | 'ख' स्तम्भः |
|---|---|
| (i) किं वाङ्मात्रेणापि। | (क) कर्तव्यं प्रपलायनम् |
| (ii) तेन पश्यन्ति विद्वांसो | (ख) अन्यत्र गतानामपि मृत्युः भविष्यति एव। |
| (iii) तत् न युक्तं साम्प्रतं | (ग) पितृपैतामहिकम् एतत् सरः त्यक्तुं युज्यते। |
| (iv) अरक्षितं तिष्ठति दैवरक्षितम् | (घ) अत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति |
| (v) तद् रात्रावपि गम्यतां | (ङ) क्षणमप्यत्र अवस्थातुम्। |
| (vi) तन्नूनं प्रभातसमये मत्स्यजीविनः | (च) किञ्चित् निकटं सरः। |
| (vii) अशक्तैर्बलिनः शत्रोः | (छ) देहभङ्ग कुलक्षयम्। |
| (viii) आयुः क्षयोऽस्ति चेत् | (ज) सुरक्षितं दैवहतं विनश्यति। |

**उत्तरम-**

| 'क' स्तम्भ: | 'ख' स्तम्भः |
|---|---|
| (i) किं वाङ्मात्रेणापि। | (ग) पितृपैतामहिकम् एतत् सरः त्यक्तुं युज्यते। |
| (ii) तेन पश्यन्ति विद्वांसो | (छ) देहभङ्ग कुलक्षयम्। |
| (iii) तत् न युक्तं साम्प्रतं | (ङ) क्षणमप्यत्र अवस्थातुम्। |
| (iv) अरक्षितं तिष्ठति दैवरक्षितम् | (ज) सुरक्षितं दैवहतं विनश्यति। |
| (v) तद् रात्रावपि गम्यतां | (च) किञ्चित् निकटं सरः। |
| (vi) तन्नूनं प्रभातसमये मत्स्यजीविनः | (घ) अत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति। |
| (vii) अशक्तैर्बलिनः शत्रोः | (क) कर्तव्यं प्रपलायनम्। |
| (viii) आयुः क्षयोऽस्ति चेत् | (ख) अन्यत्र गतानामपि मृत्युः भविष्यति एव। |

**5.** अत्र विविधपदानि सन्ति। एतेषां शब्दानाम् समानार्थकपदानि पाठात् चित्वा लिखत-

1. **सरोवरे ……………………**
2. **प्रातः ……………………**
3. **वज्रपाततुल्यम् ……………………**
4. **रिपोः ……………………**
5. **परिवारेण ……………………**
6. **कथितम् ……………………**
7. **श्रुत्वा ……………………**
8. **मरणम् ……………………**

उत्तरम्-

1. सरोवरे जलाशये
2. प्रातः प्रभात
3. वज्रपाततुल्यम् कुलिशपातोपमम्
4. रिपोः शत्रोः
5. परिवारेण परिजनेन
6. कथितम् उक्तम्
7. श्रुत्वा समाकण्र्य
8. मरणम् मृत्युः

**6.** मञ्जूषाया: अव्ययपदैः सहायतया रिक्तस्थानपूर्तिं कुरु-

1. **द्वौ मत्स्यौ परिवारेण …………………… निष्क्रान्तौ।**
2. **मत्स्यजीविनः प्रभाते …………………… आगमिष्यन्ति।**
3. **…………………… गते अपि मृत्युः भविष्यति।**
4. **किं सर्वैः श्रुतम्, …………………… सायं मत्स्यजीविभिः किम् उक्तम् इति।**
5. **यस्य गतिः नास्ति, सः …………………… गृहे स्थास्यति।**
6. **यद्भविष्यः सरः त्यक्त्वा …………………… गच्छति।**
7. **प्रत्युत्पन्नमतिः अवदत्, मम …………………… `इदं मतम्।**
8. **यद्भविष्यः अवदत्, युवाम् …………………… न वदथः।**

**मञ्जूषा-**

| अद्य/सम्यक्/न/अपि/अन्यत्र/सह/एव/अत्र |
|---|

**उत्तरम्-**

1. द्वौ मत्स्यौ परिवारेण **सह** निष्क्रान्तौ।
2. मत्स्यजीविनः प्रभाते **अत्र** आगमिष्यन्ति।
3. **अन्यत्र** गते अपि मृत्युः भविष्यति।
4. किं सर्वैः श्रुतम् **अद्य** सायं मत्स्यजीविभिः किम् उक्तम् इति।
5. यस्य गतिः नास्ति, सः **एव** गृहे स्थास्यति।
6. यद्भविष्यः सरः त्यक्त्वा **न** गच्छति।
7. प्रत्युत्पन्नमतिः अवदत्, मम **अपि** इदं मतम्।
8. यद्भविष्यः अवदत्, युवाम् **सम्यक्** न वदथः।

---

**7. अधोलिखितेषु विशेषणपदानां विशेष्यपदैः सह मेलनं कुरु-**

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| (i) सुखावहा | (क) सरः |
| (ii) त्रयः | (ख) वचः |
| (iii) कस्मिश्चित् | (ग) शत्रोः |
| (iv) पितृपैतामहिकं | (घ) ह्रदः |
| (v) बलिनः | (ङ) मत्स्याः |
| (vi) कुलिशपातोपमम् | (च) गतिः |
| (vii) बहुमत्स्यः | (छ) जलाशये |

**उत्तरम्-**

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| (i) सुखावहा | (च) गतिः |
| (ii) त्रयः | (ङ) मत्स्याः |
| (iii) कस्मिश्चित् | (छ) जलाशये |
| (iv) पितृपैतामहादिकं | (क) सरः |

| | |
|---|---|
| (v) बलिनः | (ग) शत्रोः |
| (vi) कुलिशपातोपमम् | (ख) वचः |
| (vii) बहुमत्स्यः | (घ) ह्रदः |

**8. अधोलिखितपदेषु विलोमपदानि सन्ति । एतेषां उचितं मेलनं कुरू-**

| पदानि | विलोमपदानि |
|---|---|
| (i) रात्रौ | (क) शक्तैः |
| (ii) दूरे | (ख) निकटम् |
| (iii) अशक्तैः | (ग) मित्रस्य |
| (iv) सुरक्षितम् | (घ) मूर्खाः |
| (v) शत्रोः | (ङ) प्रभाते |
| (vi) विद्वांसः | (च) म्रियते |
| (vii) जीवति | (छ) अरक्षितम् |

**उत्तरम्-**

| पदानि | विलोमपदानि |
|---|---|
| (i) रात्रौ | (ङ) प्रभाते |
| (ii) दूरे | (ख) निकटम् |
| (iii) अशक्तैः | (क) शक्तैः |
| (iv) सुरक्षितम् | (छ) अरक्षितम् |
| (v) शत्रोः | (ग) मित्रस्य |
| (vi) विद्वांसः | (घ) मूर्खाः |
| (vii) जीवति | (च) म्रियते |

**9. कर्तृवाच्यस्य वाक्यानाम् परिवर्तनं कर्मवाक्ये उचितं मेलनं कुरू-**

| कर्तृवाच्यम् | कर्मवाच्यम् |
|---|---|

| | |
|---|---|
| **उदाहरणानि** सः तिष्ठति। | तेन स्थीयते। |
| अहं चन्द्रं पश्यामि। | मया चन्द्रः दृश्यते। |
| त्वं माम् कथयसि। | त्वया अहं कथ्ये। |
| (क) गच्छन्तः मत्स्यजीविनः उक्तवन्तः। | ..................... |
| (ख) वयम् इदं बहुमत्स्यं सर: न अन्विष्टवन्तः। | ..................... |
| (ग) प्रभाते वयम् आगच्छेम। | ..................... |
| (घ) भवन्तः श्रुतवन्तः यत् मत्स्यजीविनः अभिहितवन्तः। | ..................... |
| (ङ) रात्रौ एव किञ्चित् निकटं सरः गच्छामः। | ..................... |
| (च) अशक्ताः बलिनः शत्रोः पलायनं कुर्युः। | ..................... |
| (छ) मत्स्यजीविनः तं जलाशयम् आलोड्य निर्मत्स्यतां नीतवन्तः। | ..................... |
| (ज) भवन्तौ यत् प्रतिभाति तत् कुर्याताम्। | ..................... |

**उत्तरम-** (क) गच्छद्भिः मत्स्यजीविभिः उक्तम्।

(ख) अस्माभिः इदं बहुमत्स्यं सर: न अन्विष्टम् ।

(ग) प्रभाते अस्माभिः आगम्येत।

(घ) भवद्भिः श्रुतम् यत् मत्स्यजीविभिः अभिहितम्।

(ङ) रात्रौ एव किञ्चित् निकटं सरः गम्यताम्।

(च) अशक्तैः बलिनः शत्रोः पलायनं कर्तव्यम्।

(छ) मत्स्यजीविभिः सः जलाशयः आलोड्य निर्मत्स्यतां नीतः।

(ज) भवद्भ्याम् यत् प्रतिभायते तत् कर्तव्यम् ( क्रियेत)।

**10. अत्र अनेकानि वाक्यानि मिश्रितरूपे सन्ति। पाठस्य आधारे वाक्यान् क्रमानुसारं लिखत -**

1. **मत्स्यजीविनः जलाशयं निर्मत्स्यं कृतवन्तः।**
2. **एकस्मिन् जलाशये त्रयः मत्स्याः निवसन्ति स्म।**
3. **अनागतविधाता सर्वान् मत्स्यान् आहूय तत् सरः त्यक्तुम् उपादिशत्।**
4. **यद्भविष्यः भविष्यम् आश्रित्य तत्रैव अतिष्ठत्।**
5. **प्रत्युत्पन्नमतिः अनागतविधात्रा सह सपरिवारं ह्रदं त्यक्त्वा अन्यं ह्रदं गच्छति।**
6. **प्रत्युत्पन्नमतिः अनागतविधातुः उपदेशं स्वीकरोति।**

7. **यद्भविष्यः भविष्यम् आश्रित्य मृत्युं प्राप्तवान्।**

**उत्तरम्-**

1. एकस्मिन् जलाशये त्रयः मत्स्याः निवसन्ति स्म।
2. अनागतविधाता सर्वान् मत्स्यान् आहूय तत् सरः त्यक्तुम् उपादिशत्।
3. प्रत्युत्पन्नमतिः अनागतविधातुः उपदेशं स्वीकरोति।
4. प्रत्युत्पन्नमतिः अनागतविधात्रा सह सपरिवारं ह्रदं त्यक्त्वा अन्यं ह्रदं गच्छति।
5. यद्भविष्यः भविष्यम् आश्रित्य तत्रैव अतिष्ठत्।
6. मत्स्यजीविनः जलाशयं निर्मत्स्यं कृतवन्तः।
7. यद्भविष्यः भविष्यम् आश्रित्य मृत्यु प्राप्तवान्।

---

**11. अधोलिखितभावार्थानाम् रिक्तस्थानपूर्तिः मञ्जूषापदसहायतया करणीया-**

1. ये जनाः **.....................** भवन्ति तेषां कृते ततः पलायनम् एव **.....................** अस्ति, अथवा ते ततः **.....................** स्थानं गच्छेयुः। अन्यः कोऽपि **.....................** न अस्ति।
2. येषां जनानां कृते **.....................** स्थानं विद्यते ते **.....................** देहस्य नाशम् अथवा **.....................** विनाशं न पश्यन्ति।
3. भाग्यवशात् यः **.....................** सः सुरक्षायाः उपायं विना अपि **.....................**। यस्य भाग्ये जीवनं नास्ति सः तु **.....................** अपि मृत्युं प्राप्नोति। अनाथः तु **.....................** त्यक्तः अपि जीवति।

**सहायकपदानि**

| |
|---|
| वने, विद्वांसः, निर्बलाः, सुरक्षितं, कुलस्य, रक्षितः, उपायः, मार्गः, जीवति, सम्यक् रक्षितः, अन्यत्। |

**उत्तरम्-**

1. ये जनाः **निर्बलाः** भवन्ति तेषां कृते ततः पलायनम् एव **मार्गः** अस्ति, अथवा ते ततः **सुरक्षितं** स्थानं गच्छेयुः। अन्यः कोऽपि **उपायः** न अस्ति।
2. येषां जनानां कृते **अन्यत्** स्थानं विद्यते ते **विद्वांसः** देहस्य नाशम् अथवा **कुलस्य** विनाश न पश्यन्ति।
3. भाग्यवशात् यः **रक्षितः** सः सुरक्षायाः उपायं विना अपि **जीवति**। यस्य भाग्ये जीवनं नास्ति सः तु **सम्यक् रक्षितः** अपि मृत्युं प्राप्नोति। अनाथः तु **वने** त्यक्तः अपि जीवति।

---

**12. अधोलिखितपंक्तिनाम् समानार्थक पंक्तया पाठे सन्ति। उचितं पंक्तिं चित्वा लिखत-**

1. **दैवे प्रतिकूले यत्नाः विफलाः जायन्ते।**

2. **समशक्तिभिः एव युद्धं कर्तव्यम्।**
3. **पुरुषार्थ विना भाग्यं न फलति।**

**उत्तरम्-**

1. सुरक्षितं दैवहतं विनश्यति।
2. अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्।
3. विद्यमाना गतिः येषामन्यत्रापि सुखावहा। तेन न पश्यन्ति विंद्वासो देहभङ्गकुलक्षयम्।